REVISED AND REPRINTED CHAPTERS
FOR RUCHIRA (FOR CLASS VI th) By NCERT (23)
संशोधित एवं परिवर्द्धित संस्करण
जनवरी 2018 (द्वारा राष्ट्रीय शै० अ० और प्र० परिषद)

P/C

VIth

## चतुर्थः पाठः

# विद्यालयः

एषः विद्यालयः।
अत्र छात्राः शिक्षकाः,
शिक्षिकाः च सन्ति।





एषा सङ्गणकयन्त्र-प्रयोगशाला अस्ति।
एतानि सङ्गणकयन्त्राणि सन्ति।

एतत् अस्माकं विद्यालयस्य
उद्यानम् अस्ति।
उद्याने पुष्पाणि सन्ति।
वयम् अत्र क्रीडामः पठामः च।







ऋचा – तव नाम किम्?
प्रणवः – मम नाम प्रणवः। तव नाम किम्?
ऋचा – मम नाम ऋचा। त्वं कुत्र पठसि?
प्रणवः – अहम् अत्र एव पठामि।
ऋचा – अहम् अपि अत्र एव पठामि। इदानीम् आवां मित्रे स्वः।



शिक्षिका – छात्राः! यूयं किं कुरुथ?
छात्राः – आचार्ये! वयं गच्छामः।
शिक्षिका – यूयं कुत्र गच्छथ।
छात्राः – वयं सभागारं गच्छामः।
शिक्षिका – युष्माकं पुस्तकानि कुत्र सन्ति?
छात्राः – अस्माकं पुस्तकानि अत्र सन्ति।



शिक्षकः – छात्रौ! युवां किं कुरुथः?
छात्रौ – आचार्य! आवां श्लोकं गायावः।
शिक्षकः – शोभनम्, किं युवां श्लोकं न लिखथः?
छात्रौ – आवां लिखावः, पठावः, गायावः, चित्राणि अपि रचयावः।
शिक्षकः – बहुशोभनम्?







ऋचा – तव नाम किम्?

प्रणवः – मम नाम प्रणवः। तव नाम किम्?

ऋचा – मम नाम ऋचा। त्वं कुत्र पठसि?

प्रणवः – अहम् अत्र एव पठामि।

ऋचा – अहम् अपि अत्र एव पठामि। इदानीम् आवां मित्रे स्वः।



– छात्राः! यूयं किं कुरुथ?

– आचार्ये! वयं गच्छामः।

– यूयं कुत्र गच्छथ।

– वयं सभागारं गच्छामः।

– युष्माकं पुस्तकानि कुत्र सन्ति?

– अस्माकं पुस्तकानि अत्र सन्ति।



शिक्षकः– छात्रौ! युवां किं कुरुथः?

छात्रौ – आचार्य! आवां श्लोकं गायावः।

शिक्षकः – शोभनम्, किं युवां श्लोकं न लिखथः?

छात्रौ – आवां लिखावः, पठावः, गायावः, चित्राणि अपि रचयावः।

शिक्षकः– बहुशोभनम्?



## शब्दार्थाः

| | | | |
|---|---|---|---|
| **सङ्गणकयन्त्राणि** | – | (अनेक) कम्प्यूटर | computer |
| **अस्माकम्** | – | हमारा/हम लोगों का | our |
| **वयम्** (सर्वनाम) | – | हम सब | we |
| **तव** | – | तेरा | your |
| **मम** | – | मेरा | my/mine |
| **त्वम्** (सर्वनाम) | – | तुम | you |
| **अहम्** (सर्वनाम) | – | मैं | I/my self |
| **एव** (अव्यय) | – | ही | only |
| **अपि** (अव्यय) | – | भी | also |
| **इदानीम्** (अव्यय) | – | अब/इस समय | now |
| **आवाम्** (सर्वनाम) | – | हम दोनों | we two |
| **मित्रे** (नपुं) | – | (दो) मित्र | two friends |
| **स्वः** | – | (हम दोनों) हैं | (we two) are |
| **यूयम्** (सर्वनाम) | – | तुम सब | you (all) |
| **आचार्ये!** | – | शिक्षिका (सम्बोधन) | oh teacher! |
| **युष्माकम्** | – | तुम्हारा/तुम लोगों का | your/of you (all) |
| **कुत्र** | – | कहाँ | where |
| **सभागारम्** | – | सभागार को | to the assembly/auditorium |
| **युवाम्** (सर्वनाम) | – | तुम दोनों | you two |
| **आचार्य!** | – | गुरु/शिक्षक (सम्बोधन) | oh teachre! |
| **शोभनम्** | – | अच्छा | good/fine |
| **गायावः** | – | (हम दो) गाते हैं/गाती हैं | we two sing/are singing |
| **रचयावः** | – | (हम दो) बनाते हैं/बनाती है | we two make/are making |

3



## अभ्यासः

1. उच्चारणं कुरुत।

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम् | आवाम् | अस्मान् |
| मम् | आवयोः | अस्माकम् |
| त्वम् | युवाम् | यूयम् |
| त्वाम् | युवाम् | युष्मान् |
| तव | युवयोः | युष्माकम् |

2. निर्देशानुसारं परिवर्तनं कुरुत-

यथा अहं पठामि। - (बहुवचने) - वयं पठामः।

(क) अहं नृत्यामि। - (बहुवचने) - ..............................

(ख) त्वं पठसि। - (बहुवचने) - ..............................

(ग) युवां क्रीडथः। - (एकवचने) - ..............................

(घ) आवां गच्छावः। - (बहुवचने) - ..............................

(ङ) अस्माकं पुस्तकानि। - (एकवचने) - ..............................

(च) तव गृहम्। _ (द्विवचने) _ ..............................







3. कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत-

(क) ............................ पठामि। (वयम्/अहम्)

(ख) ............................ गच्छथः। (युवाम्/यूयम्)

(ग) एतत् ............................ पुस्तकम्। (माम्/मम)

(घ) ............................ क्रीडनकानि। (युष्मान्/युष्माकम्)

(ङ) ............................ छात्रे स्वः। (वयम्/आवाम्)

(च) एषा............................ लेखनी। (तव/त्वाम्)

4. क्रियापदैः वाक्यानि पूरयत-

| | | | | | |
|---|---|---|---|---|---|
| पठसि | धावामः | गच्छावः | क्रीडथः | लिखामि | पश्यथ |

यथा- अहं पठामि।

(क) त्वं ............................

(ख) आवां ............................

(ग) यूयं ............................

(घ) अहं ............................

(ङ) युवां ............................

(च) वयं ............................

